**दिनाङ्क :- 05.05.2026**
**प्रात: - 06:55**

## संस्कृत वार्ता:

### समग्र विधानसभानिर्वाचनम्

भारतीय जनता पार्टी दलेन पश्चिमबङ्गालराज्ये चतुर्णवत्युत्तर-द्विशतं सदस्यीय-राज्य-विधानसभायां प्रचण्डं जनादेशं प्राप्य इतिहासः रचितः। अनेन स्वाधीनतानन्तरं प्रथमवारं पश्चिमबङ्गालराज्ये भाजपादलं बहुमतेन सत्तायाम् आगतमस्ति।

असम-राज्ये सत्ताधारी भाजपा-नेतृत्वयुक्तेन एनडीए-दलेन, पुनरेकवारं जनादेशं प्राप्य, तृतीयवारं सत्तायाम् आगम्यते, यत्र हि, भाजपादलेन त्रिसप्ततिः आसनानि विजितानि।

केरलम् राज्ये कांग्रेस् नेतृत्वेन यू.डि.एफ्. इति संयुक्त-लोकतान्त्रिक-घटबन्धनेन ऊनशतं आसनेषु विजयं प्राप्य, निर्णायकरूपेण सत्तां प्रति प्रत्यागमनस्य संकेतः प्रदत्तः, यत्र च कांग्रेस् दलेन त्रिषष्टिः आसनानि विजितानि।

पुदुचेरीत्यत्र राष्ट्रिय-प्रजातान्त्रिक-घटबन्धनेन एन्.डी.ए. इत्यनेन त्रिंशत् आसनेषु अष्टादश-आसनानि विजित्य सर्वकारं रचयितुं स्पष्टबहुमतं प्राप्तमस्ति।

पश्चिमबङ्गालराज्ये भवानीपुर-विधानसभाक्षेत्रे भाजपा-प्रत्याशी सुवेन्दु अधिकारी पश्चिमबङ्गालस्य मुख्यमन्त्रीं टीएमसी-नेत्रीं ममता-बनर्जीं पञ्चदश-सहस्राधिक-मतैः पराजितवान्। निर्वाचन-सूची-विशेष-सघन-पुनरीक्षणस्य (SIR) अनन्तरं प्रथम-निर्वाचने ममता बनर्जी-नेतृत्वेन तृणमूल-काङ्ग्रेस-इत्यस्य पञ्चदश-वर्षीयं शासनं समाप्तं कृत्वा भाजपादलेन बहुमतम् प्राप्तमस्ति। पश्चिमबङ्गालराज्ये भाजपादलेन षडुत्तर-द्विशतम्, तृणमूलकांग्रेसदलेन अशीतिः आसनानि च विजितानि।

### तमिलनाडु परिणामः

अभिनेता परिवर्तित-राजनेता च चन्द्रशेखरन-जोसेफ-विजयस्य नेतृत्वे तमिलग वेत्री कझगम, टीवीके इति दलेन तमिलनाडु-विधानसभा-निर्वाचने एकैक-बृहत्तम-दल-रूपेण उद्भवन् इतिहासः विनिर्मितः। राज्ये चतुस्त्रिंशदुत्तर-द्विशतं निर्वाचनक्षेत्रेषु टीवीके-दलेन अष्टोत्तर-शतम् आसनानि प्राप्तानि।

### प्रधानमन्त्री मोदी

भाजपादलस्य वरिष्ठ-नेत्रा अथ प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना ऐतिहासिकः अभूतपूर्वःदिवसोऽयमित्युक्त्वा पश्चिमबङ्गाल, असम, पुडुचेरी, तमिलनाडु, केरलम् राज्यानां जनानाम्, दलकार्यकर्तॄणां च प्रति आभारं प्रकटितम्। ह्यः नवदिल्ल्यां भाजपामुख्यालये दलकार्यकर्तॄन् सम्बोधयन् श्रीमोदी अवदत् यत् अयम् राष्ट्रस्य कृते नूतनप्रभातस्य सूचकः अस्ति तथा च जनाः भारतस्य महा-लोकतन्त्रे, कार्यप्रदर्शनस्य राजनीतिषु, 'एकभारतश्रेष्ठभारतस्य' भावनायां च विश्वासं स्थापितवन्तः।

प्रधानमन्त्रिणा मोदिना उक्तं यत् देशस्य विंशत्यधिकेषु राज्येषु भाजपा-एनडीए-सर्वकाराः सत्तायां सन्ति तथा च भाजपायाः मन्त्रः "जनता एव जनार्दनः" इति।

## भाजपा- पर्यवेक्षक पुडुचेरी

भाजपा-दलेन पुडुचेरीत्यत्र विधानसाभायाः नेतारं निर्वाचयितुं दलस्य वरिष्ठ नेता एवं केन्द्रीय मंत्री डॉ.मनसुख मण्डविया एवं पुडुचेरीत्यत्र दलस्य प्रभारी निर्मल-कुमार-सुराना च केन्द्रीय पर्यवेक्षक-रूपेण चितवन्तौ। नामद्वयमपि भाजपा संसदीयमण्डलस्य केन्द्रीयपर्यवेक्षकमण्डलेन अनुमोदितमासीत्।

## आईपीएल

आई.पी.एल. इति विंशतिम्-प्रतिविंशतिः क्रिकेट्-लीग-प्रतिस्पर्धायां, मुम्बई-नगरस्य वानखेडे-क्रीडाङ्गणे, गतरात्रौ, मुम्बई-इण्डियन्स्-दलेन लखनऊ-सुपर-जायन्ट्स्-दलं षट्-स्तोभैः पराजितम्। अद्य सायं सार्धसप्तवादने दिल्ली केपिटल्स् अथ चेन्नई सूपर् किंग्स् दलयोर्मध्ये, दिल्ल्याः अरुण-जेटली-क्रीडांगणे, क्रिकेट-लीग्-प्रतिस्पर्धा निश्चिता वर्तते।

**।। इति वार्ता:।।**